International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(6): 149-151
© 2017 IJSR
www.anantaajournal.com
Received: 27-09-2017
Accepted: 28-10-2017

*इन्द्राणी सिंह*
शोधरता, विश्वभारती विश्वविद्यालय:
पश्चिमबंगाल, भारत

Correspondence
*इन्द्राणी सिंह*
शोधरता, विश्वभारती विश्वविद्यालय:
पश्चिमबंगाल, भारत

# *वर्तमानसमाजे नीतिशतकस्य उपयोगिता*

*इन्द्राणी सिंह*

## प्रस्तावना

मनुष्य: पारिवारिक: समाजबद्धश्च जीव:। समाजपरिवारौ प्रति तस्य कर्तव्यकर्म अवश्यकरणीयम्। शैशवातिक्रान्तसमये मनुष्या: विविधप्रकाराणां कर्तव्यकर्मणां सन्मुखीना:भवन्ति। आयुष्काले एतेभ्य: कर्तव्यकर्मेभ्य: मुक्तिर्नास्ति। मानविकतावोधेनैव हि स: कर्तव्यकर्मेभ्य: न विच्युत: भवितुम् अर्हति। आमृत्यु: नैतिकादर्शेन हि मनुष्यस्य मानविकतावोध: विकशित: भवति। सामाजिकानां मनुष्यानाम् आचरणं कीदृशं भवेत्, समाजे कीदृशानि सुकर्माणि पुरुष्कृतानि भवन्ति, कीदृशानि अपकर्माणि तिरष्कृतानि वा भवन्ति –एतद्विषयाणां शिक्षया एव मनुष्यमनसिनैतिक: मूल्यवोध: जायते, येन हि मनुष्यचरित्रम् आदर्शरूपेण विकशति।

पृथिव्या: भाषासमूहेषुसुप्राचीना सुसमृद्धा च संस्कृतम् इति भाषा। सम्–कृ + क्त इति व्युत्पत्तौ निष्पादितम् संस्कृतम् इति शब्दम्। अपशब्दपरिहारेण, विभक्तिप्रयोगेण च वैदिककार्यशुद्ध्यर्थं या भाषा संस्कृता भूता सा एव संस्कृतम् नाम भाषा। जनशिक्षादर्शे अवतीर्ण:भूत्वा आचार्येण भर्तृहरिणा "नीतिशतकम्" नाम शतककाव्यम् संस्कृतभाषायाम् विरचितम्। मानवकल्याणाय संसारे उपलव्धमानानि सत्यानि एव काव्यरूपेणतेन प्रदत्तानि।न्यायमार्गं सत्यमार्गं धर्ममार्गं वा जनहिताय नीतिशतके तेन विहितम्। अत्रसदाचार: हि मनुष्यानाम् उत्कृष्टतरालङ्कारूपेण स्वीकृत:। मानवकल्याणम् इति महदार्शस्य सुस्थापणं सुज्ञापनञ्च काव्यस्य अस्य मूललक्ष्यम्।

यथाकाले यथास्थानेच यथार्थकार्यसम्पादनमेव नीति: इत्युच्यते। सूक्ष्मचिन्ताया: वहि:प्रकाशेन यथार्थसिद्धान्तावलम्वने साहाय्यं करोति नीति:। नीतिकाव्येषु अचार्येणभर्तृहरिणा विरचितंनीतिशतकमेव श्रेष्ठम्। मनुष्याणां समाजविषयकानि जीवनविषयकानि बन्धनानि, तेभ्य: मुक्तिलाभोपायश्चसुवर्णिता: सन्ति भर्तृहरिविरचिते नीतिशतके।

सामाजिका: मनुष्या: त्रिविधप्रकारेण विभिज्यन्ते भर्तृहरिणा – विज्ञ: अज्ञ: अल्पज्ञानी च। अल्पज्ञानिन: पण्डितमन्या: जना: एव मूर्खा: इति मन्यते आचार्ये:। एतादृशा: पण्डितमन्या:जना: कदापि सन्तुष्टा: न भवन्ति –

> "ज्ञानलवदुविदग्धं ब्रह्मापि तं नरं न रञ्जयति।"१

हटकारिता एव एतादृशानां मनुष्याणाम् प्रधानं स्वभावधर्मंम्। चेष्टया एव मनुष्य: असाध्यसाधने सक्षम: भवति। परन्तु मूर्खाणां मनोरञ्जनमसाध्यमेव। सदुपदेशप्रदानेन मूर्खान् यो जन: निवारयितुं चेष्टयति अन्तिमेस: एव उपहासपात्रं भवति। आचार्येण भर्तृहरिणाउक्तम् –

> "व्यालं वालमृणालतन्तुभिरसौ रोद्धुं समुज्जृम्भते
> छेत्तुं वज्रमणिं शिरीषकुसुमप्रान्तेन सन्नह्यति।
> माधुर्यं मधुविन्दुना रचयितुं क्षाराम्वुधेरीहते।
> नेतुं वाञ्छति य: खलान् पथि सतां सूक्तै: सुधास्यन्दिभि:।।"२

श्लोकादस्मात् स्पष्टरूपेण ज्ञायते सर्वासां समस्यानां शास्त्रविहितमौषधमस्ति, नास्ति केवलं मूर्खाणाम् ;

> "सर्वस्यौषधमस्ति शास्त्रविहितं मुर्खस्य नास्त्यौषधम्।"३

मूर्खविषयकमालोचनं परिसमाप्य विद्वान्विषये तेनोक्तम् – सर्वेषांश्रद्धापात्रं विद्वज्जनः। सर्वदेशे यथायोग्यं सम्मानं लभेयुः विद्वांसः। स्वदेशे विदेशे च विद्या एव हि सुवन्धुःमहागुरुः इष्टदेवश्च –

"विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः।
विद्या वन्धुजनो विदेशगमने विद्या पदा देवता।।"४

नास्ति विद्या यस्य सः एव पशुः। यस्मिन् राजतेकवित्वशक्तिः, राज्यमपि तुच्छज्ञानेन त्यजति सः। विदूषां साहचर्य्यं भवतिकल्याणकारी जनानाम्। तेषां साहचर्य्येण हि चिन्ताशीलाः वाङ्निपुणाश्च भवन्ति मनुष्याः। तेन हि वर्द्धयते सम्मानं, राजते चिन्ताप्रसन्नता, भवति यशःबृद्धि–

"जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्सङ्गतिः कथय किं न करोति पुंसाम्।।"५

तत्त्वज्ञानिनः अवमानना अकरणीया–

"अधिगतपरमार्थान् पण्डितान् मावमंस्थाः।"६

सम्पदा अनुच्छेदनीया विद्या। विद्या एव हि मनुष्याणां शाश्वतभूषणम् –

"वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते।
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्।"७

वर्तमानसमाजे अपि विद्यां प्रति विद्वांसं प्रति च सर्वेषां जनानां सुमनोभावः लक्ष्यते मनुष्यचरित्रगठने काव्यस्यास्य माहात्मं सुविदितम्। ततः मनुष्याणाम् आत्मसम्मानविषयभूता शिक्षातेन प्रदत्ताः। सः एव मनुष्यः यस्मिन् विद्यते मानं बुद्धिश्च। मानवान् जनः कदापि कुकर्म न करोति। महत्त्वशून्ये कर्मणि तेषां नास्ति ईप्सा। सिंहः हि तेषाम् आदर्शस्वरूपः। भर्तृहरिणा उक्तम् – कुक्कुरः इच्छानुरूपं भोजनं कृत्वा परितृप्तः भवति, परन्तुमानवान् जनः सुनिरीक्षणेनखाद्यं गृह्णाति खादति च –

"लाङ्गुलचालनमधश्चरणावपातं भूमौ निपत्य वदनोदरदर्शनं च।
श्वा पिण्डदस्य कुरुते गजपुङ्गवस्तु धीरं विलोकयति चाटुशतैश्च भुङ्क्ते।।"८

संसारे अस्मिन्मनुष्यः जायते पञ्चत्वं लभते च। परन्तु यस्य जन्मना स्वबंशस्य मर्यादा वर्द्धयते, तस्य जन्म हि सार्थकः –

"परिवर्तिनि संसारे मृतः को वा न जायते।
स जातो येन जातेन याति वंशः समुन्नतिम्।।"९

मानवतः शौर्यवतश्च पुरुषस्यमहत्त्वम् अनन्तमेव। समाजे स्थातुं विद्यया आत्मसम्मनेनवा अतीव प्रयोजनमस्ति, दुर्जनसुजनयोर्मर्ध्य पार्थक्यज्ञानमपि आवश्यकम्। यतो हि मनुष्यः समाजबद्धः जीवः, तर्हि वन्धुनिर्वाचने प्रयत्नः कर्तव्यः। सुजनदुर्जनयोर्मध्ये पार्थक्यकरणस्य उपायःबर्ण्यते अस्मिन् काव्ये। सज्जनः सर्वेषां पूज्यस्थानीयः। सज्जनेन अपि बन्धुरूपेण सज्जनः एव काम्यते। संयतः गुणग्राही च सज्जनः। विद्याचर्चायाम् एव सज्जनानां मतिः विराजते। समृद्धौ विपदि च धीरः क्षमाशीलश्च सज्जनः। युद्धक्षेत्रे पराक्रमशीलः, देवान् प्रति भक्तिमान्, सभायांवाग्मी च सज्जनः –

"वाञ्छा सज्जनसङ्गमे परगुणे प्रीतिर्गुरौ नम्रता
विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादाद् भयम्।
भक्तिः शूलिनि शक्तिरात्मदमने संसर्गमुक्तिः खले
येष्वेते निवसन्ति निर्मलगुणास्तेभ्यो नरेभ्यो नमः।।"१०

दानशीलः सत्यभाषी च सज्जनः। तेषां हृदि विराजते सर्वदैव पवित्रता। विपदि कठोरचित्तधारीणां महापुरुषाणां चरित्रंव्यावहारकाले सुकोमलम् –

"सम्पत्सु महतां चित्तं भवत्युत्पलकोमलम्
आपत्सु च महाशैलशिलासङ्घातकर्कशम्।।"११

नम्रस्वभावेन उन्नतिं साधयति सज्जनः। एतादृशः जनः परगुणवर्णनेन स्वगुणान् घोषयति–

"नम्रत्वेनोन्नमन्तः परगुणकथनैः स्वान् गुणान् ख्यापयन्तः।।"१२

सज्जनः स्वदान कर्म्माणि गोपयति। गृहे आगतम् अतिथिं देवज्ञानेसेवते, साहाय्यकारिणः सुकर्म्माणि जनसमक्षे आनन्देन सह घोषयति –

"प्रदानं प्रच्छन्नं गृहमुपागते सम्भ्रमविधिः।
प्रियं कृत्वा मौनं सदसि कथनं चाप्युपकृतेः।।"१३

पक्षान्तरे दुर्जनः स्वभावधर्मेणैव निर्दयः। सज्जनानां गुणराशिंकलङ्कितकरणमेव तेषां लक्ष्यम् –

"तत् को नाम गुणो भवेत् स गुनिणां यो दुर्जनैर्नाङ्कितः।"१४

मनिना भूषितः सर्पः यथा भयङ्करः तथैव विद्याभूषितः भूत्वापि दुर्जनः जनः सर्वदैवपरिहर्तव्यः–

"दुर्जनः परिहर्तव्यो विद्ययालङ्कृ तोऽपि सन्।
मणिना भूषितः सर्पः किमसौ न भयङ्करः।।"१५

दुर्जनसंसर्गेण सुखं न उत्पद्यते। काले गते दुर्जनेन सह मित्रता शिथिला भवति। सज्जनेन सह दुर्जनः अकारणेनैव शत्रुतायते –

"लुब्धकधीवरापिशुना निष्कारणवैरिणो जगति।।"१६

ततः अस्मिन् काव्ये अर्थविषयकानिउपदेशानि वर्णितानि सन्ति। अर्थव्यवस्था एव देशश्य स्तम्भस्वरूपः। अर्थमेव सर्वेषां गुणाणाम् आधारस्वरूपम् इति वर्ण्यते कविना –

"यस्यास्ति वित्तं स नरः कुलीनः स पण्डितः स श्रुतवान् गुणाज्ञः।
स एव वक्ता स च दर्शनीयः सर्वे गुणाः काञ्चनमाश्रयन्ति।।"१७

अर्थाभावेन मनुष्याणां गुणाणि नश्यन्ते। अदृष्टनिर्दिष्टम् अर्थमेव उपार्जयितुं शक्यते–

"यद्धात्रा निजभालपट्टलिखितं स्तोकं महद्वा धनं।
तत् प्राप्नोति मरुस्थलेऽपि नितरां मेरौ ततो नाधिकम्।।"१८

अत: धैर्य्यमेव श्रेष्ठं धनम्। प्राज्ञ: जन: अभिष्टलाभार्थं धैर्यमेव अवलम्वते। लोभात् भयात् वा ते कदापि लक्ष्यभ्रष्टा: न भवति –

"कदार्थितस्यापि न धैर्यवृत्तेर्न शक्यते धैर्यगुण: प्रमार्ष्टुम्।।"१९

धैर्य्यगुणाधारी कामक्रोधलोभजयी जन: एव त्रिभुवनकर्ता।

संस्कृतसाहित्यजगते नीतिज्ञापकेषु काव्येषुविशिष्टं काव्यमिदम्। आचार्येन भर्तृहरिणाविरचितेन धर्म–दर्शन–समाजविद्या–सदाचारप्रतिपादितेन नीतिशतककाव्येन न केवलंपतितृप्तो भवति पाटकहृदय:, अपि तु समाजे आदर्शचरित्रगठनस्य शिक्षापि प्राप्यतेकाव्येऽस्मिन्। नीतिशतकं यथार्थरूपेणैव नीतिमूलकंकाव्यम्। मानवजीवनस्य न्यायादर्शा: एव अत्र प्रतिपाद्यन्ते। उत्तम: अधमश्चइति द्विधाविभज्यते मनुष्यजाति:। विवेकज्ञानं विना कल्याणप्रवणतापापविमुखता च न सम्पद्येते। अस्मिन् काव्ये दुष्कर्माणि तिरष्कृतानि, सुकर्माणि पुरुष्कृतानिच सन्ति। महत्या आकाङ्क्षयाअनुप्राणित: भूत्वा महदादर्शान् अनुसरणं कृत्वा मनुष्या: जीवनपथि अग्रग्रामिण: भवेयु: – नीतिशतके आचार्येणभर्तृहरिणाएतादृशंपथनिर्देशनणमेव उपदिष्टम्।

***तथ्यसूत्राणि***

1. नीतिशतकम् श्लोक: – 3
2. नीतिशतकम् श्लोक: – 6
3. नीतिशतकम् श्लोक: – 11
4. नीतिशतकम् श्लोक: – 17
5. नीतिशतकम् श्लोक: – 20
6. नीतिशतकम् श्लोक: – 14
7. नीतिशतकम् श्लोक: – 16
8. नीतिशतकम् श्लोक: – 24
9. नीतिशतकम् श्लोक: – 25
10. नीतिशतकम् श्लोक: – 52
11. नीतिशतकम् श्लोक: – 56
12. नीतिशतकम् श्लोक: – 61
13. नीतिशतकम् श्लोक: – 58
14. नीतिशतकम् श्लोक: – 44
15. नीतिशतकम् श्लोक: – 43
16. नीतिशतकम् श्लोक: – 51
17. नीतिशतकम् श्लोक: – 33
18. नीतिशतकम् श्लोक: – 41
19. नीतिशतकम् श्लोक: – 77

**Bibliography**


1. चक्रवर्ती सोमनाथ। *कथाय कर्मे एथिकस्*। प्रग्रेसिभ पावलिशार्स। कलकाता। 2011
2. वागची दीपक कुमार। *भारतीय नीतिविद्या*। प्रगतिशील प्रकाशन। कलकाता। 2014
3. शास्त्री गौरीनाथ। *संस्कृत साहित्यसम्भार*। नवपत्र प्रकाशन। कलिकाता। 2014